Shri Sankalpakalpadrumah

# શ્રીસઙ્કલ્પકલ્પદ્રુમઃ

## Document Information

Text title : sankalpakalpadrumaH

File name : sankalpakalpadrumaH.itx

Category : devii, rAdhA, vishvanAthachakravartin, stavAmRRitalaharI, devI

Location : doc_devii

Author : Vishwanatha Chakravarti

Transliterated by : Jan Brzezinski (Jagadananda Das) jankbrz at yahoo.com and Neal Delmonico (Nitai Das) ndelmonico at sbcglobal.net

Proofread by : Jan Brzezinski, Neal Delmonico

Acknowledge-Permission: http://granthamandira.net Gaudiya Grantha Mandira

Latest update : March 16, 2019

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 24, 2023

*sanskritdocuments.org*

# શ્રીસઙ્કલ્પકલ્પદ્રુમઃ

શ્રીશ્રીરાધામદનગોપાલો વિજયતે
વૃન્દાવનેશ્વરિ વયોગુણરૂપલીલા
    સૌભાગ્યકેલિકરુણાજલધેઽવધેહિ ।
દાસી ભાવાનિ સુખયાનિ સદા સકાન્તાં
    ત્વામાલીભિઃ પરિવૃતામિદમેવ યાચે ॥ ૧॥

શ‍ૃઙ્ગારયાણિ ભવતીમભિસારયાણિ
    વીક્ષ્યૈવ કાન્તવદનં પરિવૃત્ય યાન્તીમ્ ।
ધૃત્વાઞ્ચલેન હરિસન્નિધિમાનયાનિ
    સમ્પ્રાપ્ય તર્જનસુધાં હૃષિતા ભવાનિ ॥ ૨॥

પાદે નિપત્ય શિરસાનુનયાનિ રુષ્ટાં
    તાં પ્રત્યપાઙ્ગકલિકામપિ ચાલયાનિ ।
તદ્દોર્દ્વયેન સહસા પરિરમ્ભયાનિ
    રોમાઞ્ચકઞ્ચુકવતીમવલોકયાનિ ॥ ૩॥

પ્રાણપ્રિયે કુસુમતલ્પમલઙ્કુરુ ત્વં
    ઇત્યચ્યુતોક્તિમકરન્દરસં ધયાનિ ।
માં મુઞ્ચ માધવ સતીમિતિ ગદ્ગદાર્ધ
    વાચસ્તવૈત્ય નિકટં હરિમાક્ષિપાનિ ॥ ૪॥

વામામુદસ્ય નિજવક્ષસિ તેન રુદ્ધાં
    આનન્દબાષ્પતિમિતાં મુહુરુચ્છલન્તીમ્ ।
વ્યસ્તાલકાં સ્ખલિતવેણીમબદ્ધનીવીં
    ત્વાં વીક્ષ્ય સાધુ જનુરેવ કૃતાર્થયાનિ ॥ ૫॥

તલ્પે મયૈવ રચિતે બહુશિલ્પભાજિ
    પૌષ્પે નિવેશ્ય ભવતીં નનનેતિ વાચમ્ ।
કૃષ્ણં સુખેન રમયન્તમનન્તલીલં

વાતાયનાત્તનયનૈવ નિભાલયાનિ ॥ ૬॥

સ્થિત્વા બહિર્વ્યજનયન્ત્રનિબદ્ધડોરી
પાણિર્વિકર્ષણવશાન્મૃદુ બીજયાનિ ।
ઉત્તુઙ્ગકેલિકલિતશ્રમબિન્દુજાલં
આલોપયાનિ મણિતૈઃ સ્મિતમુદ્ગીરાણિ ॥ ૭॥

શ્રીરૂપમઞ્જરિમુખપ્રિયકિઙ્કરીણાં
આદેશમેવ સતતં શિરસા વહાનિ ।
તેનૈવ હન્ત તુલસી પરમાનુકમ્પા
પાત્રીભવાનિ કરવાણિ સુખેન સેવામ્ ॥ ૮॥

માલ્યાનિ હારકટાદિમૃજા વિચિત્ર
વર્તિઃ શિતાંશુઘુસૃણાગુરુચન્દનાદિ ।
વીટીર્લવઙ્ગખપુરાદિયુતાઃ સખીભિઃ
સાર્ધં મુદા વિરચયાનિ કલાં પ્રકાશ્ય ॥ ૯॥

ત્વાં સ્રસ્તવેષવસનાભરણાં સકાન્તાં
વીક્ષ્ય પ્રસાધનવિધૌ દ્રુતમુદ્યતાભિઃ ।
શ્રીરૂપરઙ્ગતુલસીરતિમઞ્જરીભિ-
ર્દૃષ્ટાનયાનિ તવ સંમુખમેવ તાનિ ॥ ૧૦॥

ત્વામાશિખાચરણમૂઢવિચિત્રવેષાં
સ્પ્રષ્ટું પુનશ્ચ ધૃતતૃષ્ણમવેક્ષ્ય કૃષ્ણમ્ ।
આયાન્તમેવ વિકટભ્રૂકુટીવિભઙ્ગ
હુઙ્કૃત્યુદઞ્ચિતમુખી વિનિવર્તયાનિ ॥ ૧૧॥

તત્રૈત્ય વિસ્મયવતીં લલિતાં પ્રતીહ
સાધ્વીત્વકણ્ટકવિનિષ્ક્રમનાર્થમસ્યાઃ ।
પ્રાપ્તં ન્યસિદ્ધદયિ મામિયમેવ ધૂર્તે-
ત્યુક્તિં હરેઃ સ્વહૃદયં રસયાનિ નિત્યમ્ ॥ ૧૨॥

નિષ્ક્રમ્ય કુઞ્જભવનાદ્વિપિને વિહર્તું
કાન્તૈકબાહુપરિરબ્ધતનું પ્રયાન્તીમ્ ।
ત્વામાલીભિઃ સહ કથોપકથાપ્રફુલ્લ
વક્ત્રામહં વ્યજનપાણિરનુપ્રયાણિ ॥ ૧૩॥

ગાયાનિ તે ગુણગણાંસ્તવ વર્ત્મ ગમ્યં
    પુષ્પાસ્તરૈર્મૃદુલયાનિ સુગન્ધયાનિ ।
સાલીતતિઃ પ્રતિપદં સુમનોऽતિવૃષ્ટિં
    સ્વામિન્યહં પ્રતિદિશં તનવાનિ બાઢમ્ ॥ ૧૪॥

પ્રેષ્ઠસ્વપાનિ કૃતકૌસુમહાર કાઞ્ચી
    કેયૂરકુણ્ડલકિરીટવિરાજિતાઙ્ગીમ્ ।
ત્વાં ભૂષયાણિ પુનરાત્મકવિત્વપુષ્પૈ-
    રાસ્વાદયાનિ રસિકાલિતતીરિમાનિ ॥ ૧૫॥

ચન્દ્રાંશુરુપ્યસલિલૈરવસિક્તરોધ
    સ્યઞ્ચત્કદમ્બસુરભાવલિગીતકીર્તિ ।
આરબ્ધરાસરભસાં હરિણા સહ ત્વાં
    તત્પાઠિતૈવ વિદુષી કલયાનિ વીણામ્ ॥ ૧૬॥

રાસં સમાપ્ય દયિતેન સમં સખીભિ-
    ર્વિશ્રાન્તિભાજિ નવમાલતિકાનિકુઞ્જે ।
ત્વય્યાનયાનિ રસવત્કરકામ્રરમ્ભા-
    દ્રાક્ષાદિકાનિ સરસં પરિવેષયાણિ ॥ ૧૭॥

તલ્પે સરોજદલક્લૃપ્તમનઙ્ગકેલિ
    પર્યાપ્તમાપ્તકલયા રચિતં તુલસ્યા ।
ત્વાં પ્રેયસા સહ રસાદધિશાયયાનિ
    તામ્બૂલમાશાયિતુમુલ્બનમુલ્લસાનિ ॥ ૧૮॥

સંવાહયાનિ ચરણાવલકૈઃ સ્પૃશાનિ
    જિઘ્રાણિ સૌરભસમૂઢચમત્ક્રિયાબ્ધિઃ ।
અક્ષ્ણોર્દધાન્યુરસિજૌ પરિરમ્ભયાનિ
    ચુમ્બાન્યલક્ષિતમવેક્ષિતસૌકુમાર્યાઃ ॥ ૧૯॥

અન્તે નિશસ્તનુતરપ્રસૃતાલકાલ્યા
    તાડઙ્કહારતતિગન્ધવહાગ્રમુક્તાઃ ।
પ્રેષ્ઠસ્ય તે તવ ચ સંગ્રથિતા નિભાલ્ય
    તત્રાનયાનિ પરમાપ્તસખીઃ પ્રબોધ્ય ॥ ૨૦॥

તા દર્શયાનિ સુખસિન્ધુષુ મજ્જયાનિ
    તાભ્યઃ પ્રસાદમતુલં સહસાપ્નુવાનિ ।

તન્નૂપુરાદિરણિતૈર્ગતસાન્દ્રનિદ્રાં
    શય્યોત્થિતાં સચકિતાં ભવતીં ભજાનિ ॥ ૨૧॥

હે સ્વામિનિ પ્રિયસખીત્રપયાકુલાયા
    કાન્તાઙ્ગતસ્તવ વિયોક્તુમપારયન્ત્યાઃ ।
ઉદ્ગ્રન્થયાન્યલકકુણ્ડલમાલ્યમુક્તા
    ગ્રન્થિં વિચક્ષણતયાઙ્ગુલિકૌશલેન ॥ ૨૨॥

નાશાગ્રતઃ શ્રુતિયુગાચ્ચ વિયોજયાનિ
    તદ્ભૂષણં મણિસરાંસ્તુ વિસૂત્રયાણિ ।
પ્રાણાર્બુદાદધિકમેવ સદા તવૈકં
    રોમાપિ દેવિ કલયાનિ કૃતાવધાના ॥ ૨૩॥

ત્વાં સાલિમાત્મસદનં નિભૃતં વ્રજન્તીં
    ત્યક્ત્વા હરેરનુપથં તદલક્ષિતૈત્ય ।
તં ખણ્ડિતામનુનયન્તમવેક્ષ્ય ચન્દ્રાં
    તદ્વૃત્તમાલિતતિસંસદિ વર્ણયાનિ ॥ ૨૪॥

પ્રક્ષાલયાનિ વદનં સલિલૈઃ સુગન્ધૈ-
    ર્દન્તાન્ રસાલજદલૈસ્તવ ધાવયાનિ ।
નિર્ણેજયાનિ રસનાં તનુહેમપત્ર્યા
    સન્દર્શયાનિ મુકુરં નિપુણં પ્રમૃજ્ય ॥ ૨૫॥

સ્નાનાય સૂક્ષ્મવસનં પરિધાપયાનિ
    હારાઙ્ગદાદ્યપ્યઙ્ગાદવતારયાણિ ।
અભ્યઞ્જયાણ્યરુણસૌરભહૃદ્યતૈલૈ-
    ર્વર્તયાનિ નવકુઙ્કુમચન્દ્રચૂર્ણૈઃ ॥ ૨૬॥

નીરૈર્મહાસુરભિભિઃ સ્નપયાનિ ગાત્રા-
    દમ્ભાંસિ સૂક્ષ્મવસનૈરપસારયાણિ ।
કેશાન્ જવાદગુરુધૂમકુલેન યત્ના-
    દાશોષયાણિ રભસેન સુગન્ધયાનિ ॥ ૨૭॥

વાસો મનોભિરુચિતં પરિધાપયાનિ
    સૌવર્ણકઙ્કતિકયા ચિકુરાન્વિશોધ્ય ।
ગુમ્ફાનિ વેણીમમલૈઃ કુસુમૈર્વિચિત્રાં
    અગ્રે લસચ્ચમરિકામણિજાતભાતામ્ ॥ ૨૮॥

ચૂડામણિં શિરસિ મૌક્તિકપત્રપાસ્યાં
    ભાલે વિચિત્રતિલકં ચ મુદારચય્ય ।
અઙ્ક્ત્વાક્ષિણી શ્રુતિયુગં મણિકુણ્ડલાઢ્યં
    નાસામલઙ્કૃતવતીં કરવાણિ દેવિ ॥ ૨૯॥

ગણ્ડદ્વયે મકરિકે ચિબુકે વિલિખ્ય
    કસ્તુરિકેષ્ટપૃષતં કુચયોશ્ચ ચિત્રમ્ ।
બાહ્વોસ્તવાઙ્ગદયુગં મણિબન્ધયુગ્મે
    ચૂડા મસારકલિતાઃ કલયાનિ યત્નાત્ ॥ ૩૦॥

પાણ્યઙ્ગુલીઃ કનકરત્નમયોર્મિકાભિ-
    રભ્યર્ચયાનિ હૃદયં પદકોત્તમેન ।
મુક્તોતકઞ્ચુલિકયોરસિજૌ વિચિત્ર
    માલ્યેન હારનિચયેન ચ કણ્ઠદેશમ્ ॥ ૩૧॥

કાઞ્ચ્યા નિતમ્બમર્થહંસકનૂપુરાભ્યાં
    પાદામ્બુજે દલતતિં ક્વણદઙ્ગુરીયૈઃ ।
લાક્ષારસૈરરુણમપ્યનુરઞ્જયાનિ
    હે દેવિ તત્તલયુગં કૃતપુણ્યપુઞ્જા ॥ ૩૨॥

અઙ્ગાનિ સાહજિકસૌરભયન્ત્યથાનિ
    દેવ્યર્ચયાનિ નવકુઙ્કુમચર્ચયૈવ ।
લીલામ્બુજં કરતલે તવ ધારયાણિ
    ત્વાં દર્શયાનિ મણિદર્પણમર્પયિત્વા ॥ ૩૩॥

સૌન્દર્યમદ્ભુતમવેક્ષ્ય નિજં સ્વકાન્ત
    નેત્રાલિલોભનમવેત્ય વિલોલગાત્રીમ્ ।
પ્રાણાર્બુદેન વિધુવર્તિકદીપકૈશ્ચ
    નિર્મઞ્છયાનિ નયનામ્બુનિમજ્જિતાઙ્ગી ॥ ૩૪॥

ગોષ્ઠેશ્વરીપ્રહિતયા સહ કુન્દવલ્લ્યા
    પ્રાભાતિકપ્રિયતમાશનસાધનાય ।
યાન્તીં સમં પ્રિયસખીભિરનુપ્રયાણિ
    તામ્બૂલસમ્પુટમણિવ્યજનાદિપાણિઃ ॥ ૩૫॥

ગોષ્ઠેશ્વરીસદનમેત્ય પદે પ્રણમ્ય

તસ્યાસ્તદાપ્તભવિકાં ત્રપયાવૃટાઙ્ગીમ્ ।
ઘ્રાતં તયા શિરસિ તન્નયનામ્બુસિક્તાં
ત્વાં વીક્ષ્ય તામહમપિ પ્રણમામિ ભક્ત્યા ॥ ૩૬॥

મૂર્તં તપોઽસિ વૃષભાનુકુલસ્ય ભાગ્યં
ગેહસ્ય મેઽસિ તનયસ્ય ચ મે વરાઙ્ગિ ।
નૈરુજ્યદાસ્યમૃતપાણિરભૂર્વરેણ
દુર્વાસસો યદિતિ તદ્વચસા હસાનિ ॥ ૩૭॥

સ્નાતાનુલિપ્તવપુષો દયિતસ્ય તસ્ય
તાત્કાલિકે મધુરિમન્યતિલોલિતાક્ષીમ્ ।
સ્વામિન્યવેત્ય ભવતીં ક્વચન પ્રદેશે
તત્રૈવ કેન ચ મિષેણ સમાનયાનિ ॥ ૩૮॥

પ્રક્ષાલયાનિ ચરણૌ ભવદઙ્ગતઃ સ્રઙ્-
માલ્યાદિ પાકરચનાનુપયોગિ યત્તત્ ।
ઉત્તારયાણિ તદિદં તુ તવાસ્ત્વિતિ ત્વ-
દ્વાચોલ્લસાનિ વિકસન્મધુમાધવીવ ॥ ૩૯॥

પક્ત્વાસ્થિતાં મધુરપાયસશાકસૂપ
ભાજિપ્રભૃત્યમૃતનિન્દિચતુર્વિધાન્નમ્ ।
ત્વાં લોકયાનિ નનનેતિ મુહુર્વદન્તીં
ગોષ્ઠેશયાપિ પરિવેષયિતું નિદિષ્ટામ્ ॥ ૪૦॥

તૃપ્ત્યુત્થિતાં પ્રિયતમાઙ્ગરુચિં ધયન્ત્યા
વાતાયન્તાર્પિતદૃશઃ સહસોલ્લસન્ત્યાઃ ।
આનન્દજદ્યુતિતરઙ્ગભરે મનોજ
મઞ્જુકૃતે તવ મનો મમ મજ્જયાનિ ॥ ૪૧॥

રાધે તવૈવ ગૃહમેતદહં ચ જાતે
સૂનોઃ શુભે કિમપરાં ભવતીમવૈમિ ।
તદ્ભુઙ્ક્ષ્વ સમ્મુખમિતિ વ્રજપાગિરા ત્વ-
દ્વક્ત્રે સ્મિતં સ્વહૃદયં રસયાનિ નિત્યમ્ ॥ ૪૨॥

યાન્તં વનાય સખીભિઃ સમમાત્મકાન્તં
પિત્રાદિભિઃ સરુદિતૈરનુગમ્યમાનમ્ ।
વીક્ષ્યાપ્તગૌરવગેહાં દિનનાથપૂજા

વ્યાજેન લબ્ધગહનાં ભવતીં ભજાનિ ॥ ૪૩॥

કાન્તં વિલોક્ય કુસુમાવચયે પ્રવૃત્તાં
આદાય પત્રપુટીકામનુયાન્ચહં ત્વામ્ ।
કા તસ્કરીયમિતિ તદ્વચસા ન કાપી-
ત્યુક્ત્યા સહાર્પિતદૃશં ભવતીં સ્મરાણિ ॥ ૪૪॥

પુષ્પાણિ દર્શય કિયન્તિ હૃતાનિ ચૌરી-
ત્યુક્ત્યૈવ પુષ્પપુટિકામપિ ગોપયાનિ ।
તદ્વીક્ષ્ય હન્ત મમ કક્ષતલે ક્ષિપન્તં
પાણિં બલાત્તમભિમૃશ્ય ભવાનિ દૂના ॥ ૪૫॥

રક્ષાદ્ય દેવિ કૃપયા નિજદાસિકાં માં
ઇત્યુચ્ચકાતરગિરા શરણં વ્રજાનિ ।
કિં ધૂર્ત દુઃખયસિ મજ્જનમિત્યમુષ્ય
બાહું કરેણ તુદતીં ભવતીં શ્રયાણિ ॥ ૪૬॥

ત્યક્ત્વૈવ માં ભવદુરઃકવચં વિખણ્ડ્ય
પ્રામ્લાં શ્રજં તવ ગલાત્સ્વગલે નિધાય ।
પુષ્પાણિ ચૌરિ મમ કિં તવ કણ્ઠહેતો-
સ્તત્કણ્ઠમેવ સુભૃશં પરિપીડયાનિ ॥ ૪૭॥

રાજાસ્તિ કન્દરતલે ચલ તત્ર ધૂર્તે
તસ્યાજ્ઞયૈવ સહસા ચ વિવસ્ત્રયિષ્યે ।
તાં વીક્ષ્ય હૃષ્યતિ સ ચેન્ નિજદિવ્યમુક્તા
માલાં પ્રદાસ્યતિ લલાટતટે મદીયે ॥ ૪૮॥

દોષો ન તે વ્રજપતેસ્તનયોઽસિ તસ્ય
દુષ્ટસ્ય યન્ નરપતેઃ ખલુ સેવકોઽભૂઃ ।
તદ્બુદ્ધિરીદૃગભવન્મમ ચાત્ર સાધ્વ્યા
ભાલે કિમેતદભવલ્લિખિતં વિધાત્રા ॥ ૪૯॥

ઇત્યાદિવાઙ્મયસુધામહહ શ્રુતિભ્યાં
સ્વાભ્યાં ધયાન્યુદરપૂરમથેક્ષણાભ્યામ્ ।
રૂપામૃતં તવ સકાન્તતયા વિલાસ
સીધું ચ દેવિ વિતરાણ્યથ માદયાનિ ॥ ૫૦॥

પ્રેષ્ઠે સરસ્યભિનવાં કુસુમૈર્વિચિત્રાં
    હિન્દોલિકાં પ્રિયતમેન સહાધિરૂઢામ્ ।
ત્વાં દોલયાન્યથ કિરાણિ પરાગરાજિ-
    ર્ગાયાનિ ચારુમહતીમપિ વાદયાનિ ॥ ૫૧॥

વૃન્દાવને સુરમહીરુહયોગપીઠે
    સિંહાસને સ્વરમણેન વિરાજમાનામ્ ।
પાદ્યાર્ઘ્યધૂપવિધુદીપચતુર્વિધાન્ન
    સ્રગ્ભૂષણાદિભિરહં પરિપૂજયાનિ ॥ ૫૨॥

ગોવર્ધને મધુવનેષુ મધૂત્સવેન
    વિદ્રાવિતાત્રપસખીશતવાહિનીકામ્ ।
પિષ્ટાત યુદ્ધમનુ કાન્તજયાય યાન્તીં
    ત્વાં ગ્રાહયાણિ નવજાતુષકૂપિકાલીઃ ॥ ૫૩॥

અગ્રે સ્થિતોઽસ્મિ તવ નિશ્ચય એવ વક્ષ
    ઉદ્ઘાટ્ય કન્દુકચયં ક્ષિપ ચેદ્બલિષ્ઠા ।
ઉદ્ઘાટ્ય કઞ્ચુકમુરઃ કિલ દર્શયન્તી
    ત્વં ચાપિ તિષ્ઠ યદિ તે હૃદિ વીરતાસ્તિ ॥ ૫૪॥

યત્કથ્યસે તદયમેવ તવ સ્વભાવો
    યત્પૂર્વજન્મનિ ભવાનજિતઃ કિલાસીત્ ।
મિથ્યૈવ તત્યદિહ ભોઃ કતિશો જિતોઽભૂ-
    ર્મત્કિઙ્કરીભિરપિ તદ્વિગતત્રપોઽસિ ॥ ૫૫॥

ઇત્યેવમુત્પુલકિની કલયાનિ વાચઃ
    સિઞ્જાનકઙ્કણઝનત્કૃતદુન્દુભીકમ્ ।
યુદ્ધં મુખામુખિ રદારદિ ચારુબાહુ
    બાહવ્યમન્દનખરાનખરિ સ્તુવાનિ ॥ ૫૬॥

કસ્યાઞ્ચિદદ્રિનૃપદીવ્યદુપત્યકાયાં
    સ પ્રેયસિ ત્વયિ સખીશતવેષ્ટિતાયામ્ ।
વિશ્રાન્તિભાજિ વનદેવતયોપનીતા
    નીષ્ટાનિ સીધુચષકાણિ પુરા દધાનિ ॥ ૫૭॥

હા કિં કિં કિં ધધરણી ઘુઘુઘૂર્ણતીયં
    ધાધાધધાવતિ ભયાદ્વિવિવૃક્ષપુઞ્જઃ ।

ભીભીભિભીરુરહમત્ર કથં જિજીવા-
    મ્યેવં લગિષ્યસિ સદા દયિતસ્ય કણ્ઠે ॥ ૫૮॥

ત્વત્સ્વામિની પ્રલપતીયમિમાં ગદેન
    હીનાં કરોમિ કલયાત્ર નિરેહિ નેતઃ ।
ઇત્યુક્તિસીધુરસતર્પિતહૃત્તદૈવ
    નિષ્ક્રમ્ય જાલ વિતતૌ વિદધાનિ નેત્રે ॥ ૫૯॥

ઘ્રાણાક્ષિકર્ણવદને જલસેકતત્યા
    કૃષ્ણસ્ત્વયા જિત ઇતઃ સહસા નિમજ્જ્ય ।
ગ્રાહો ભવન્ સ ખલુ યત્કુરુતે સ્મ તત્તુ
    વેદાન્યહં તવ મુખામ્બુજમેવ વીક્ષ્ય ॥ ૬૦॥

અભ્યઞ્જયાનિ સસખીદયિતાં સહાલિ-
    સ્ત્વાં સ્નાપયાનિ વસનાભરણૈર્વિચિત્રમ્ ।
શૃઙ્ગારયાણિ મણિમન્દિર પુષ્પતલ્પે
    સમ્ભોજયાનિ કરકાદ્યથ શાયયાનિ ॥ ૬૧॥

વાણીરકુઞ્જ ઇહ તિષ્ઠતિ દેવી નિહ્નુત્ય
    મૃગ્યસિ કથં તદિતઃ પરત્ર ।
સત્યામિમાં મમ ગિરં તમવિશ્વસન્તં
    યાન્તં મયિ પ્રદર્શ્ય ભવતી હર્ષયાણિ ॥ ૬૨॥

સ્વામિન્યમૂત્રહરિરસ્તિ કદમ્બકુઞ્જે
    નિહ્નુત્ય મૃગ્યસિ કથં તદિતઃ પરત્ર ।
સત્યામિમાં મમ ગિરં ખલુ વિશ્વસત્યાઃ
    પાણૌ જયં તવ નયાનિ તમાપ્નુવત્યાઃ ॥ ૬૩॥

રાધે જિતા ચ જયિની ચ પણં ન દાતું
    આદાતુમપ્યહહ ચુમ્બનમીશિષે ત્વમ્ ।
નાશ્લેષચુમ્બમધુરાધરપાનતોઽન્યં
    દ્યૂતે ગ્લહં રસવિદઃ પ્રવરં વદન્તિ ॥ ૬૪॥

ગોવર્ધનેઽત્ર મમ કાપિ સખી પુલિન્દ
    કન્યાસ્તિ ભૃઙ્ગ્યતિતરાં નિપુણેદૃશેઽર્થે ।
મદ્ગ્રાહ્યદેયપણવસ્તુનિ મન્ત્રિયુક્તા
    સા તે ગૃહીષ્યતિ ચ દાસ્યતિ ચોપગૂહમ્ ॥ ૬૫॥

ઉક્ત્વેત્થમાત્મદયિતં પ્રતિ વક્ષ્યસે માં
    યાહીત્યથોત્પુલકિની દ્રુતપાદપાતા ।
તામાનયાન્યુપ મુકુન્દમથાસયાનિ
    તં લજ્જયાનિ સુમુખીરતિ હાસયાનિ ॥ ૬૬॥

સ્વીયા કિલ વ્રજપુરે મુરલી તવૈકા
    પ્રાભૂન્ ન તામપિ ભવાનવિતું સ્વભાર્યામ્ ।
સા લમ્પટાપિ ભવતોઽધરસીધુસિક્તા-
    પ્યન્યં પુમાંસમિહ મૃગ્યતિ ચિત્રમેતત્ ॥ ૬૭॥

વંશીં સતીં ગુણવતીં સુભગાં દ્વિષન્ત્યોઽ
    સાધ્વ્યો ભવત્ય ઇહ તત્સમતામલબ્ધાઃ ।
તાં ક્વાપિ બન્ધમનયંસ્તદહં ભુજાભ્યાં
    બદ્ધ્વૈવ વઃ શિખરિગહ્વરગાઃ કરોમિ ॥ ૬૮॥

ઇત્યાગતં હરિમવેક્ષ્ય રહસ્તદીય
    કક્ષાદહં મુરલિકાં સહસા ગૃહીત્વા ।
તાં ગોપયાનિ તદલક્ષિતમાત્તચિત્ર
    પુષ્પેષુ સઙ્ગરરસાં કલયાનિ ચ ત્વામ્ ॥ ૬૯॥

બ્રહ્મન્નિમામનુગૃહાણ ભવન્તમેવ
    ભાસ્વન્તમર્ચયિતુમિચ્છતિ મે સ્નુષેયમ્ ।
ઇત્યાર્યયા પ્રણમિતાં ધૃતવિપ્રવેશે
    કૃષ્ણેઽર્પિતાં ચ ભવતીં સ્મિતભાગ્ભજાનિ ॥ ૭૦॥

યાન્તીં ગૃહં સ્વગુરુનિઘ્નતયાતિલૌલ્યાત્-
    કાન્તાવલોકનકૃતે મિષમામૃશન્તીમ્ ।
દૂરેઽનુયાનિ યદતોઽનુવિવર્તિતાસ્યાં
    એહીતિ વક્ષ્યસિ તદાસ્યરુચો ધયન્તી ॥ ૭૧॥

ગેહાગતાં વિરહિણીં નવપુષ્પતલ્પે
    ત્વાં શાયયાનિ પરતઃ કિલ મુર્મુરાભાત્ ।
તસ્માત્પરત્ર શયનં વિસપુઞ્જક્લૃપ્તં
    અધ્યાશયાનિ વિધુચન્દનપઙ્કલિપ્તામ્ ॥ ૭૨॥

આકર્ણ્ય ચન્દનકલાકથિતં વ્રજેશા

સન્દેશમુત્સુકમતેઃ સરસા સહાલ્યાઃ ।
સાયન્તનાશનકૃતે દયિતસ્ય નવ્ય
કર્પૂરકેલિબટકાદિવિનિર્મિતૌ તે ॥ ૭૩॥

લિમ્પાનિ ચુલ્લિમથ તત્ર કટાહમચ્છ
મારોહયાણિ દહનં રચયાનિ દીપ્તમ્ ।
નિરાજ્યખણ્ડકદલીમરિચેન્દુસીરિ
ગોધૂમચૂર્ણમુખવસ્તુ સમાનયાનિ ॥ ૭૪॥

અત્યદ્ભુતં મલયજદ્રવસેકતત્યા
વૃદ્ધિં જગામ યદિદં વિરહાનલૌજઃ ।
કર્પૂર કેલીબટકાવલિસાધનાગ્નિ
જ્વાલેન શાન્તિમનયત્તદિતિ બ્રુવાણિ ॥ ૭૫॥

ધૂલિર્ગવાં દિશમરુદ્ધ હરેઃ સહામ્બા
રાવેત્યુદન્તમતુલં મધુ પાયયાનિ ।
તત્પાનસંમદનિરસ્તસમસ્તકૃત્યાં
ત્વામુત્થિતાં સહગણામભિસારયાણિ ॥ ૭૬॥

તત્કૃષ્ણવર્ત્મનિકટસ્થલમાનયાનિ
નિર્વાપયાણિ વિરહાનલમુન્નતં તે ।
આયાત એષ ઇતિ વલ્લિનિગૂઢગાત્રીં
આકૃષ્ય મહ્યમહહેશ્વરિ કોપયાનિ ॥ ૭૭॥

શ્રીકૃષ્ણદૃઙ્મધુલિહૌ ભવદાસ્યપદ્મં
આઘ્રાપયાણ્યતિતૃષન્ તવ દૃક્ચકોરીમ્ ।
તદ્વક્ત્રચન્દ્રવિકસત્સ્મિતધારયૈવ
સંજીવયાનિ મધુરિમ્ણિ નિમજ્જયાનિ ॥ ૭૮॥

વૈવશ્યમસ્ય તવ ચાદ્ભુતમીક્ષયાણિ
ત્વામાનયાનિ સદનં લલિતાનિદેશાત્ ।
કર્પૂરકેલ્યમૃતકેલિતતિં પ્રદાતું
ગોષ્ઠેશ્વરીમનુ સરાણિ સમં સખીભિઃ ॥ ૭૯॥

ગત્વા પ્રણમ્ય તવ શં કથયાનિ દેવિ
પૃષ્ટા તયાથ બટકાવલિં ભોક્ષયિત્વા ।
તાં હર્ષયાણિ ભવદદ્ભુતસદ્ગુણાલી-

સ્તત્કીર્તિતાઃ સવયસે શ઼ૃણવાનિ હૃષ્ટા ॥ ૮૦॥

વીક્ષ્યાગતં તનયમુન્નતસમ્ભ્રમોર્મિ
મગ્નાં સ્તનાક્ષિપયસામભિષિચ્ય પૂરૈઃ ।
અભ્યઞ્જનાદિકૃતયે નિજદાસિકાસ્તા
માં ચાપિ તાં નિદિશતીં મનસા સ્તવાનિ ॥ ૮૧॥

સ્નાનાનુલેપવસનાભરણૈર્વિચિત્ર
શોભસ્ય મિત્રસહિતસ્ય તયા જનન્યા ।
સ્નેહેન સાધુ બહુભોજિતપાયિતસ્ય
તસ્યાવશેષિતમલક્ષિતમાદદાનિ ॥ ૮૨॥

તેનૈવ કાન્તવિરહજ્વરભેષજેન
તાત્કાલિકેન તદુદન્તરસેન ચાપિ ।
આગત્ય સાધુ શિશિરીકરવાણિ શીઘ્રં
ત્વન્નેત્રકર્ણરસનાહૃદયાણિ દેવિ ॥ ૮૩॥

સ્નાનાય પાવનતડાગજલે નિમગ્નાં
તીર્થાન્તરે તુ નિજબન્ધુવૃતો જલસ્થઃ ।
સંમજ્જ્ય તત્ર જલમધ્યત એત્ય સ ત્વાં
આલિઙ્ગ્ય તત્ર ગત એવ સમુત્થિતઃ સ્યાત્ ॥ ૮૪॥

તન્ નો વિદુર્નિકટગા અપિ તે નનન્દૃ
સ્વસ્રાદયો ન કિલ તસ્ય સહોદરાદ્યાઃ ।
જ્ઞાત્વાહમુત્પુલકિતૈવ સહાલિરેત-
ચ્ચાતુર્યમેત્ય લલિતાં પ્રતિ વર્ણયામિ ॥ ૮૫॥

ઉદ્યાનમધ્યવલભીમધિરુહ્ય તત્ર
વાતાયનાર્પિતદૃશં ભવતીં વિધાય ।
સન્દર્શ્ય તત્પ્રિયતમં સુરભીર્દુહાનં
આનન્દવારિધિમહોર્મિષુ મજ્જયાનિ ॥ ૮૬॥

ગત્વા મુકુન્દમથ ભોજિતપાયિતં તં
ગોષ્ઠેશયા તવ દશાં નિભૃતં નિવેદ્ય ।
સઙ્કેતકુઞ્જમધિગત્ય પુનઃ સમેત્ય
ત્વાં જ્ઞાપયાન્યયિ તદુત્કલિકાકુલાનિ ॥ ૮૭॥

ત્વાં શુક્લકૃષ્ણરજનીસરસાભિસાર
    યોગ્યૈર્વિચિત્રવસનાભરણૈર્વિભૂષ્ય ।
પ્રાપય્ય કલ્પતરુકુઞ્જમનઙ્ગસિન્ધૌ
    કાન્તેન તેન સહ તે કલયાનિ કેલીઃ ॥ ૮૮॥

હે શ્રીતુલસ્યુરુકૃપાદ્યુત તરઙ્ગિણી ત્વં
    યન્મૂર્ધ્નિ મે ચરણપઙ્કજમાદધાઃ સ્વમ્ ।
યચ્ચાહમપ્યપિબમમ્બુ મનાક્ તદીયં
    તન્મે મનસ્યુદયમેતિ મનોરથોऽયમ્ ॥ ૮૯॥

ક્વાહં પરશતનિકૃત્યનુબિદ્ધચેતાઃ
    સંકલ્પ એષ સહસા ક્વ સુદુર્લભાર્થે ।
એકા કૃપૈવ તવ મામજહત્યુપાધિ
    શૂન્યૈવ મન્તુમદધત્યગતેર્ગતિર્મે ॥ ૯૦॥

હે રઙ્ગમઞ્જરિ કુરુષ્વ મયિ પ્રસાદં
    હે પ્રેમમઞ્જરિ કિરાત્ર કૃપાદૃશં સ્વામ્ ।
મામાનય સ્વપદમેવ વિલાસમઞ્જ-
    ર્યાલીજનૈઃ સમમુરીકુરુ દાસ્યદાને ॥ ૯૧॥

હે મઞ્જુલાલિ નિજનાથપદાબ્જસેવાં
    સાતત્યસમ્પદતુલાસિ મયિ પ્રસીદ ।
તુભ્યં નમોऽસ્તુ ગુણમઞ્જરિ માં દયસ્વ
    મામુદ્ધરસ્વ રસિકે રસમઞ્જરિ ત્વમ્ ॥ ૯૨॥

હે ભાનુમત્યનુપમપ્રણયાબ્ધિમગ્ના
    સ્વસ્વામિનોસ્ત્વમસિ માં પદવીં નય સ્વામ્ ।
પ્રેમપ્રવાહપતિતાસિ લવઙ્ગમઞ્જ-
    ર્યાત્મીયતામૃતમયીં મયિ ધેયિ દૃષ્ટિમ્ ॥ ૯૩॥

હે રૂપમઞ્જરિ સદાસિ નિકુઞ્જયૂનોઃ
    કેલિકલારસવિચિત્રિતચિત્તવૃત્તિઃ ।
ત્વદ્દત્તદૃષ્ટિરપિ યત્સમકલ્પયં તત્-
    સિદ્ધૌ તવૈવ કરુણા પ્રભુતામુપૈતુ ॥ ૯૪॥

રાધાઙ્ગ શશ્વદુપગૂહનતસ્તદામ્ર
    ધર્મદ્રવેન તનુચિત્તધૃતેન દેવ ।

ગૌરો દયાનિધિરભૂરપિ નન્દસૂનો
  તન્મે મનોરથલતાં સફલીકુરુ ત્વમ્ ॥ ૯૫॥

શ્રીરાધિકાગિરિભૃતૌ લલિતાપ્રસાદ
  લભ્યાવિતિ વ્રજવને મહતીં પ્રસિદ્ધિમ્ ।
શ્રુત્વાશ્રયાણિ લલિતે તવ પાદપદ્મં
  કારુણ્યરઞ્જિતદૃશં મયિ હા નિધેહિ ॥ ૯૬॥

ત્વં નામરૂપગુણશીલવયોભિરૈક્યા-
  દ્રાધેવ ભાસિ સુદૃશાં સદસિ પ્રસિદ્ધા ।
આગઃશતાન્ ન ગણયન્ત્યુરરીકુરુષ્વ
  તન્માં વરાઙ્ગિ નિરુપાધિકૃપે વિશાખે ॥ ૯૭॥

હે પ્રેમસમ્પદતુલા વ્રજનવ્યયૂનોઃ
  પ્રાણાધિકાઃ પ્રિયસખાઃ પ્રિયનર્મસખ્યઃ ।
યુષ્માકમેવ ચરણાબ્જરજોઽભિષેકં
  સાક્ષાદવાપ્ય સફલોઽસ્તુ મમૈવ મૂર્ધા ॥ ૯૮॥

વૃન્દાવનીયમુકુટ વ્રજલોકસેવ્ય
  ગોવર્ધનાચલગુરો હરિદાસવર્ય ।
તત્સન્નિધિસ્થિતિયુષો મમ હૃત્શિલાસ્વ-
  પ્યેતા મનોરથલતાઃ સહસોદ્ભવન્તુ ॥ ૯૯॥

શ્રીરાધયા સમં તદીયસરોવર ત્વત્-
  તીરે વસાનિ સમયે ચ ભજાનિ સંસ્થામ્ ।
ત્વન્નીરપાનજનિતા મમ તર્ષવલ્લ્યઃ
  પાલ્યાસ્ત્વયા કુસુમિતાઃ ફલિતાશ્ચ કાર્યાઃ ॥ ૧૦૦॥

વૃન્દાવનીયસુરપાદપ યોગપીઠ
  સ્વસ્મિન્ બલાદિહ નિવાસયસિ સ્વયં યત્ ।
તન્મે ત્વદીયતલસ્તસ્થુષ એવ સર્વ
  સઙ્કલ્પસિદ્ધિમપિ સાધુ કુરુષ્વ શીઘ્રમ્ ॥ ૧૦૧॥

વૃન્દાવનસ્થિરચરાન્ પરિપાલયિત્રિ
  વૃન્દે તયો રસિકયોરતિસૌભગેન ।
આઢ્યાસિ તત્કુરુકૃપાં ગણના યથૈવ
  શ્રીરાધિકાપરિજનેષુ મમાપિ સિદ્ધ્યેત્ ॥ ૧૦૨॥

વૃન્દાવનાવનિપતે જય સોમ સોમ
    મૌલે સનન્દનસનાતનનારદેડ્ય ।
ગોપીશ્વર વ્રજવિલાસિ યુગાઙ્ઘ્રિપદ્મે
    પ્રીતિં પ્રયચ્છ નિરુપાધિ નમો નમસ્તે ॥ ૧૦૩॥

હિત્વાન્યાઃ કિલ વાસના ભજત રે વૃન્દાવનં પ્રેમદં
    રાધાકૃષ્ણવિલાસવારિધિરસાસ્વાદં ચેત્વિન્દથ ।
ત્યક્તું શક્નુથ ન સ્પૃહામપિ પુનસ્તત્રૈવ હૃદ્વૃત્તયો
    વિશ્રબ્ધાઃ શ્રયત મમૈવ સતતં સઙ્કુલ્પકલ્પદ્રુમમ્ ॥ ૧૦૪॥

ઇતિ શ્રીવિશ્વનાથચક્રવર્તીઠક્કુરવિરચિતઃ
    શ્રીસઙ્કુલ્પકલ્પદ્રુમઃ સમ્પૂર્ણઃ ।

---

*Shri Sankalpakalpadrumah*

pdf was typeset on September 24, 2023

Please send corrections to *sanskrit@cheerful.com*